Sl.No. :

नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions – 23

No. of Printed Pages – 11

**SS–12–Sanskrit Sah.**

यहाँ से काटिए

# उच्च माध्यमिक परीक्षा, 2023

## SENIOR SECONDARY EXAMINATION, 2023

## संस्कृत साहित्यम्

समय : 3:15 (सपाद त्रिवादनम्)

पूर्णाङ्क : 80

प्रश्न पत्र को खोलने के लिए यहाँ फाड़ें

**परीक्षार्थिभ्य: सामान्य निर्देशा:**

1) परीक्षार्थिभि: सर्वप्रथमं स्वप्रश्नपत्रोपरि नामांक: अनिवार्यत: लेख्य: ।

2) सर्वे प्रश्ना: अनिवार्या: ।

3) प्रत्येकं प्रश्नस्योत्तरं उत्तरपुस्तिकायामेव देयम् ।

4) प्रत्येकं प्रश्नभागस्य उत्तरं क्रमानुसारमेकत्रैव लेखितव्यम् ।

यहाँ से काटिए

## खण्ड – 'अ'

1) अधोलिखित प्रश्नानाम् उचितं विकल्पं चिनुत –

i) चातकोऽपि कं न याचते? [1]

अ) राजानम्

ब) ग्रीष्मघनम्

स) शरद्घनम्

द) वर्षर्तुघनम्

ii) अधिकार: ते कुत्र वर्तते? [1]

अ) धर्मे

ब) कर्मणि

स) चलने

द) जन्मनि

iii) केषाम् उपदेष्टार: विरला: सन्ति? [1]

अ) धनिकानाम्

ब) मन्त्रिणाम्

स) निर्धनानाम्

द) राज्ञाम्

iv) अपण्डितानां विभूषणं किम्? [1]

अ) वाक्पटुता

ब) अधैर्यम्

स) मौनम्

द) युद्धनिपुणता

v) पर्वता: कति सन्ति? [1]

अ) सप्त

ब) अष्ट

स) चत्वार:

द) षड्

vi) नीडेषु के प्रतिनिवर्तन्ते? [1]

अ) चटका:

ब) कलविङ्का:

स) कपोता:

द) मयूरा:

vii) मम पूर्वतनं पत्रं त्वया प्राप्तं स्यात्। अत्र कर्तृपदं किम्? [1]

अ) मम

ब) पत्रम्

स) प्राप्तम्

द) त्वया

viii) अवधीरयन्त: खेदयन्ति <u>हितोपदेशदायिनो</u> गुरून्। रेखाङ्कितपदस्य विशेष्यपदं किम्? [1]

अ) खेदयन्ति

ब) अवधीरयन्त:

स) गुरून्

द) न किमपि

ix) तदानीमेव तस्य कार्यालय लिपिक: श्रीदास: प्रविशति। अत्र तस्य इतिपदस्य संज्ञा पदं किम्? [1]

अ) डॉ. नारायणस्य

ब) श्रीनायारस्य

स) श्रीदासस्य

द) श्री चन्द्रशेखस्य

x) ननु <u>मूर्खा:</u>। पठितमेव युष्माभिरपि तत्काण्डम्। रेखाङ्कितपदस्य उचितं विलोम पदं किम्? [1]

अ) विदुष:

ब) विद्वांस:

स) विद्वान्

द) विद्वस:

xi) ''भू–विभागा:'' इति पाठः कस्मात् ग्रन्थात् सङ्कलितः? [1]

अ) समुद्रसङ्गमात्

ब) वेदविज्ञानात्

स) शिवराज्योदयात्

द) तर्कसङ्ग्रहात्

xii) किं नाम विस्फुरन्ति शस्त्राणि? इति वाक्यं क:कथयति? [1]

अ) अरुन्धती

ब) कौसल्या

स) लवः

द) जनकः

2) अधोलिखित पदयो: रिक्तस्थानानि पूरयत –

क) प्रकृति प्रत्ययो: संयोगं कुरुत –

i) यद्रत्नं रत्नाभरणादिकं सूते तद् ................ । (ग्रह्+ण्यत्) [1]

ii) अयि जात! ............... कथय। (कथ् +तव्यत्) [1]

ख) प्रकृति प्रत्ययो: विभागं कुरूत –

i) वाग्भूषणं ................ । (भूषणम्) [1]

ii) श्रीकृष्णेन अत्र ज्ञान भक्तिकर्मणां समन्वय: ............... । (प्रस्तुत:) [1]

ग) उचित विभक्ति प्रयोगं कुरूत –

i) ................ बहि: सरोवर: शोभते। (ग्राम) [1]

ii) जननी ............... गच्छति। (कार्यालय) [1]

3) क) अधोलिखितानां प्रश्नानाम् उत्तराणि लिखत –

i) ऋतुसंहारस्य लेखक: क:? [1]

ii) ''ज्ञानकाण्डम्'' इति अस्य नामान्तरं किम्? [1]

iii) भवभूते: करूणरस प्रधाना रचना का? [1]

iv) श्रीमद्भगवद्गीतायां कति श्लोका: सन्ति? [1]

v) बाणभट्टस्य प्रथमगद्यकृति: का? [1]

vi) 'आधुनिक बाण:' क: कथ्यते? [1]

vii) 'पाषाणीकन्या' कथासङ्ग्रहस्य अनुवादक: क:? [1]

viii) 'विद्योदय' नाम संस्कृत पत्रिकाया: सम्पादक: क: आसीत्? [1]

ix) 'जयपुर वैभवम्' इति ग्रन्थस्य रचनाकारस्य नाम किम्? [1]

x) 'कार्यं वा साधयेयम् देहं वा पातयेयम्' इति प्रसिद्ध वाक्यं कस्मिन् ग्रन्थे उल्लिखितम् अस्ति? [1]

ख) अधोलिखितेषु रेखाङ्कित शब्दयो: सूत्रोल्लेखपूर्वकं विभक्ति निर्देशं कुरूत –

i) भक्त: <u>हरिं</u> भजति। [1]

ii) <u>नम:</u> ते। [1]

## <u>खण्ड – 'ब'</u>

4) अधोलिखित छन्दसो: कस्यचिद् एकस्य लक्षणम् उदाहरणं च लिखत – [2]

i) वसन्ततिलका

ii) उपेन्द्रवज्रा

5) अधोलिखित – पद्यांशयो: कस्यचिद् एकस्य गणचिह्नं प्रदर्शयन् छन्दस: नामोल्लेखं कुरूत – [2]

i) स्वभाव एवैष परोप कारिणाम्।

ii) मनो में संमोह स्थिर मपि हरत्येष बलवान्।

6) अधोलिखितयो: अलङ्कारयो: कस्यचिद् एकस्य लक्षणम् उदाहरणं च लिखत– [2]

i) अनुप्रास:

ii) उत्प्रेक्षा

7) अधोलिखित–पद्यांशयो: कस्मिश्चिद् एकस्मिन् अलङ्कारस्य नामोल्लेखं कुरूत– [2]

i) अनलङ्कृतशरीरोऽपि चन्द्रमुख आनन्दयति मम हृदयम्।

ii) उच्छलद् भूरि कीलाल: शुशुभे वाहिनीपति:।

8) अधोलिखित प्रश्नयो: उत्तरे लिखत – [2]

i) मगणस्य गणचिह्नं किम्?

ii) सत्यर्थे पृथगर्थाया: स्वरव्यञ्जनसंहते: क्रमेण आवृत्ति: कस्मिन् अलङ्कारे भवति?

9) अधोलिखित पद्ययो: कस्यचिद् एकस्य अन्वयं लिखत – [2]

यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जन:।

स: यत्प्रमाणं कुरूते लोकस्तदनु वर्तते।।

अथवा

परोपकाराय फलन्ति वृक्षा:, परोपकाराय वहन्ति नद्य: ।

परोपकाराय दुहन्ति गाव:, परोपकारार्थमिदं शरीरम् ।।

**10)** अधोलिखित शब्दानाम् अर्थं लिखत – **[2]**

i) नीरजम्

ii) दैष्टिकताम्

iii) कौतुकम्

iv) प्राज्ञ:

**11)** अधोलिखित पदयो: सूत्रोल्लेखपूर्वकं सन्धिविच्छेदं कुरूत – **[2]**

i) वागीश :

ii) हरिं वन्दे

**12)** अधोलिखित पदयो: सूत्रोल्लेखपूर्वकं सन्धिं कुरूत – **[2]**

i) होतृ+ऋकार:

ii) प्र+एजते

**अधोलिखितम् अपठित गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि यथानिर्देशं लिखत –**

सङ्घटन द्वारा किं न भवति? किमस्ति दुष्करं कर्म यत् सङ्घटनशक्त्या सुकरं न जायते? अस्माकं पूर्वजानां सङ्घटन–सम्बन्धिन्यो गौरवगाथा: सम्पूर्णविश्वस्य पुनरावृत्तपृष्ठेषु सुवर्णाक्षरैरंकिता: सन्ति। पुन: किमघ कारणं यद् वयं स्वकीयां महतीं शक्तिं विस्मृतिगर्ते निपात्य अकर्मण्या भूत्वा तिष्ठामो निजं दिष्टं च दुष्टं घोषयन्त: शपामहे। दिनेष्वेषु सङ्घटनशक्ते: फलं प्रत्यक्षमपि विलोक्यतेऽत्र यदिदानीं लोका असम्भवमपि कार्यं सम्भवं कुर्वन्त: सङ्घटनस्य माहात्म्यं चरितार्थयिष्यन्ति। वस्तुत: सङ्घटने एव शक्तिनिवास:। अपूर्णतामपि पूरयति इदम्।

प्रश्ना:

**13)** एकपदेन उत्तरत – **[2]**

i) दुष्कर मपि कर्म कया सुकरं जायते?

ii) कुत्र शक्ति निवास: विद्यते?

**14)** पूर्णवाक्येन उत्तरत – **[2]**

i) एषु दिनेषु सङ्घटनशक्तेः फलं कथं विलोक्यते?

ii) अस्माकं गौरवगाथाः कीदृशैः अक्षरैः अङ्किताः सन्ति?

**15)** भाषा–सम्बद्धकार्यम् – **[2]**

i) 'विलोक्यते' इति क्रियाः कर्तृपदं किम्?

ii) 'दिनेषु एषु' अत्र विशेष्यपदं किम्?

iii) किमस्ति दुष्करं कर्म यत् सङ्घटनशक्त्या सुकरं न जायते। अत्र सर्वनाम पदं किम्?

iv) अपूर्णतामपि पूरयति इदम्। अत्र अपूर्ण इति पदस्य विलोम पदं किम्?

**16)** उपर्युक्त गद्यांशस्य समुचितं शीर्षकं लिखत। **[2]**

## <u>खण्ड – 'स'</u>

**17)** अधोलिखितेषु कयोश्चित् द्वयोः सप्रसङ्गं हिन्दी भाषया भावार्थं लिखत – **[3]**

i) लक्ष्मीः स्वयं वाञ्छति वासहेतोः।

ii) वसुधैव कुटुम्बकम्।

iii) सततं वाग्भूषणम् भूषणम्।

iv) प्रत्यक्षानुमानागमाः प्रमाणानि।

**18)** अधोलिखितं गद्यांशं पठित्वा एतदाधारित प्रश्नाम् उत्तराणि यथा निर्देशं लिखत – **[3]**

एवं चतुर्णां परस्परं विवादो लग्नः। ततो ब्राह्मणो राजसमीपमागत्य चतुर्णां विवाद वृत्तान्तम कथयत्। राजापि तच्छ्रुत्वा तस्मै ब्राह्मणाय चत्वार्यपि रत्नानि ददौ। इति कथां कथयित्वा पुत्तलिका राजान मवदत्, भो राजन् त्वय्येवंविध – सहज मौदार्यं विद्यते चेदस्मिन् सिंहासने समुपविश।

प्रश्नाः–

i) चतुर्णां कथं विवादो लग्नः? (एकपदेन उत्तरत)

ii) पुत्तलिका राजानं किमवदत्? (पूर्णवाक्येन उत्तरत)

iii) राजापि तच्छ्रुत्वा तस्मै ब्राह्मणाय चत्वार्यपि रत्नानि ददौ। 'ददौ'। इति क्रियापदस्य कर्तृपदं किम्?

अथवा

अहं देशसेवां कर्तुं गृहाद् बहिरभवम्। मया निश्चितमासीत् 'एतावन्ति दिनानि स्वोदर सेवायै क्लिष्टोऽभवम्। इदानीं कियन्तं कालं देशसेवायामपि लक्ष्यं ददामि।' यथैवाहं मार्गेऽग्रेसरो भवामि, तथैव मम बाल्याध्यापक महोदयः सम्मुखोऽभवत्।

प्रश्नाः–

i) लेखकः कुत्र अग्रेसरः भवति? (एकपदेन उत्तरत)

ii) कः लेखकस्य सम्मुखें अभवत्? (पूर्णवाक्येन उत्तरत)

iii) <u>अहं</u> देश सेवां कर्तुं गृहाद् बहिर भवम् वाक्येऽस्मिन रेखाङ्कितपदस्य क्रियापदं किम्?

**19)** निम्नलिखितं पद्यं पठित्वा एतदाधारित प्रश्नानामुत्तराणि यथानिर्देशं लिखत – **[3]**

नीरक्षीर विवेके हंसालस्यं त्वमेव तनुषे चेत्।

विश्वस्मिन्नधुनान्यः कुलव्रतं पालयिष्यति कः।।

प्रश्नाः

i) नीरक्षीर विवेक गुणी कः वर्तते? (एकपदेन उत्तरत)

ii) हंसः कुत्र कुलव्रतं पालयति? (पूर्णवाक्येन उत्तरत)

iii) त्वम् इति कर्तृ पदस्य क्रियापदं किम्?

अथवा

नियतं कुरू कर्म त्वं कर्म ज्यायो ह्यकर्मण:।

शरीरयात्रापि च ते न प्रसिद्ध्येदकर्मण:।।

प्रश्ना:

i) अकर्मण: किं न सिद्ध्येत्? (एकपदेन उत्तरत)

ii) कर्म कथं करणीयम्? (पूर्णवाक्येन उत्तरत)

iii) 'नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मण:' अत्र क्रियापदं किम्?

20) अधोलिखितं नाट्यांशं पठित्वा एतदाधारित प्रश्ननानाम् उत्तराणि यथा निर्देशं लिखत – [3]

कौसल्या : जात! अस्ति ते माता? स्मरसि वा तातम्?

लव: : नहि।

कौसल्या: : तत: कस्य त्वम्?

लव: : भगवत: सुगृहीतनाम धेयस्य वाल्मीके:।

कौसल्या: : अयि जात! कथयितव्यं कथय।

लव: : एतावदेव जनामि।

प्रश्ना:–

i) 'स्मरसि वा तातम् इति कौसल्या कं वदति? (एक पदेन उत्तरत)

ii) मातु: नाम अनुक्ते सति कौसल्या लवं किं पृच्छति? (पूर्ण वाक्येन उत्तरत)

iii) अस्ति ते माता इत्यत्र कर्तृपदं किम्? लिखत?

अथवा

छात्रा: – नमोनम: आचार्य! स्वागतम् अत्र भवतां कक्षायाम्।

योगाचार्य: – छात्रा:! भवन्त: सम्प्रति समुत्सुका: दृश्यन्ते। काऽपि विशिष्टा जिज्ञासा अस्ति किम्?

सागर: – भो आचार्य! वयं सर्वे योगस्य उपयोगिताया: विषये सम्यग्रूपेण ज्ञातुम् उत्सुका:स्म।

योगाचार्य: – प्रियच्छाया:! किं भवन्त: जानन्ति यत् योगशास्त्रे शरीरस्य मनस:च नियमनं प्रतिपादितं वर्तते। अस्य ज्ञानेन अभ्यासेन च भवन्त: स्वाध्यायेऽपि एकाग्रतां वर्धयितुं सक्षमा: भविष्यन्ति।

प्रश्ना:–

i) सागरस्य कथनानुसारं छात्रा: कस्य विषये ज्ञातु मुत्सुका: सन्ति? (एकपदेन उत्तरत)

ii) योगशास्त्रे कस्य नियमनं प्रतिपादितम्? (पूर्णवाक्येन उत्तरत)

iii) विशिष्टा जिज्ञासा अस्ति किम्? अत्र विशेष्यपदं किम्?

## <u>खण्ड – 'द'</u>

21) रेखाङ्कित पदानि आधृत्य प्रश्ननिर्माणं कुरूत। (केषाञ्चित् चतुर्णाम्) [4]

i) अतिजवेन दूरमतिक्रान्त: स: <u>चपल:</u> दृश्यते?

ii) <u>उपार्जितानां वित्तानां</u> त्याग एव हि रक्षणम्।

iii) तदानीमेव <u>तस्य</u> कार्यालय लिपिक: श्रीदास: प्रविशति।

iv) तच्छ्रुवा <u>राजा</u> <u>तूष्णी</u>मासीत्।

v) <u>मनुष्याणां</u> हिंसावृत्तिस्तु निरवधि:।

vi) <u>अन्धकारेऽस्मिन्</u> यासि त्वमवश्यम्।

22) निम्नलिखित वाक्यानां संस्कृतानुवादं कुरूत्। (केषाञ्चित् चतुर्णाम्) [4]

i) उद्यान में भ्रमर गुञ्जन कर रहे है।

ii) वृद्ध उपनेत्र से देखता है।

iii) मेरी अध्ययन मे रूचि है।

iv) चोर आरक्षक से डरता है।

v) माली वृक्ष से पुष्प चुनता है।

vi) मेरे विद्यालय का वातावरण मनोहर है।

23) अधोलिखितयो कमपि विषयम् अधिकृत्य 50-60 शब्देषु संस्कृतभाषया निबन्धं लिखत – [4]

परोपकार:

अथवा

संस्कृत भाषाया: महत्त्वम्

OOOO

DO NOT WRITE ANYTHING HERE